## त्वे च। (६४/१००२)

त्वप्रत्यये परतो ङ्यापोः बहुलं ह्रस्वो भवति। तदजाया भावः अजत्वम्, अजात्वम्। तद्रोहिण्या भावः रोहिणित्वम्, [1]रोहिणीत्वम् (काठ. सं. ८. १)। सञ्ज्ञायामसम्भवाच्छन्दस्येवोदाहरणानि भवन्ति॥

## इष्टकेषीकामालानां चिततूलभारिषु। (६५/१००६)

इष्टकेषीकामालानां चित तूल भारिन् इत्येतेषु उत्तरपदेषु यथासङ्ख्यं ह्रस्वो भवति। इष्टकचितम्। इषीकतूलम्। मालभारिणी कन्या। [2]इष्टकादिभ्यस्तदन्तस्यापि ग्रहणं [3]भवति। पक्वेष्टकचितम्। मुञ्जेषीकतूलम्। उत्पलमालभारिणी [4]कन्या॥

## खित्यनव्ययस्य। (६६/२०४३)

[5]खिदन्ते उत्तरपदेऽनव्ययस्य ह्रस्वो भवति। कालिंमन्या। हरिणिंमन्या। मुमा ह्रस्वो न बाध्यते, अन्यथा हि ह्रस्वशासन[6]मनर्थकं स्यात्। अनव्ययस्य इति किम्? दोषामन्यमहः। दिवामन्या रात्रिः। अनव्ययस्य इत्येतदेव ज्ञापकमिह खिदन्तग्रहणस्य॥

## अरुर्द्विषदजन्तस्य मुम्। (६७/२०४२)

अरुस् द्विषत् इत्येतयोरजन्तानां च खिदन्त उत्तरपदे [7]मुमागमो भवति अनव्ययस्य। अरुन्तुदः। द्विषन्तपः। अजन्तानाम्–कालिम्मन्या। अरुर्द्विषदजन्तस्य इति किम्? विद्वन्मन्यः। अनव्ययस्य इत्येव, दोषामन्यमहः। दिवामन्या रात्रिः। अन्तग्रहणं [8]किम्? कृताजन्तकार्यप्रतिपत्त्यर्थम्। अतो ह्रस्वे कृते मुम् भवति॥

## इच एकाचोऽम्प्रत्ययवच्च। (६८/२००४)

इजन्तस्य एकाचः खिदन्ते उत्तरपदे अमागमो भवति, [9]अम्प्रत्ययवच्च द्वितीयैकवचनवच्च स भवति। अम् इति हि द्विरावर्तते। गाम्मन्यः। स्त्रीम्मन्यः, स्त्रियम्मन्यः। श्रियम्मन्यः। भ्रुवम्मन्यः[10]। अम्प्रत्ययवच्च इत्यतिदेशात् आत्वपूर्वसवर्णगुणेयङुवङादेशा भवन्ति। इचः इति किम्? त्वङ्मन्यः। [11]एकाचः इति किम? [12]लेखाभ्रुम्मन्यः। अथेह कथं भवितव्यम्, श्रियमात्मानं ब्राह्मणकुलं मन्यते इत्युपक्रम्य श्रिमन्यम् इति भवितव्यम् इति भाष्ये व्यवस्थितम्? तत्रेदं भाष्यकारस्य दर्शनम्, अत्र विषये परित्यक्तस्वलिङ्गः श्रीशब्दो ब्राह्मणकुले वर्तते, यथा प्रष्ठादयः स्त्रियाम्। तत्र 'स्वमोर्नपुंसकात्' (७.१.२३/३१९) इत्यमो लुग् भवति॥

## वाचंयमपुरन्दरौ च। (६९/२०५७)

वाचंयम पुरन्दर इत्येतौ [13]निपात्येते। वाचंयम आस्ते। पुरं दारयति इति पुरन्दरः[14]॥

---

1. उदाहरणमिदं नास्ति ह. 2. इष्टकादिभिः ब. 3. भवति नास्ति फ. 4. कन्या नास्ति फ. 5. ह्रस्व इति वर्तते इत्यधिकम् ह. 6. अनवकाशं ब. ह. 7. मुम् फ. 8. किम् नास्ति ह. 9. अम्प्रत्ययवच्च नास्ति ह. 10. वरंमन्यः इत्यधिकम् ड. ह. फ. 11. वाक्यमिदं नास्ति फ. 12. उदाहरणमिदं नास्ति फ. 13. शब्दौ इत्यधिकम् फ. 14. शक्रः इत्यधिकम् ब. ह, वाचि यमो व्रते, पूः सर्वयोर्दारिसहोः इति खच् प्रत्यय इत्यधिकम् फ. ह.